MSS No. 211 Subject Religion

Name of MSS वैराग्य शतक

Author – –

Period – – Folios 7

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 3, 5, 6 9

१ यांचिंत्यामि सततं मयि सा विरक्ता साप्यन्यमिच्छति जनं स जनोन्यसक्तः अस्मत्कृते च परि
तुष्यति काचिदन्या धिग् तां च तं च मदनं च इमां च मां च १

वैराग्य शतक
६ पत्रक ॥ ल० प० १३ पं० प्र० पृ०

ह० ल०

पू

ॐ

वै॰श

१ ॐ श्रीगणेशाय नमः अथ वैराग्यशतकं ॐ दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये

1 ये स्वानुभूत्येकमानाय नमः शान्ताय तेजसे १ बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः अ

बोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् २ न संसारोत्पन्नं चरितमनुपश्यामि कुशलम् विपाकः जायंते

पुण्यानां जनयति भयं मे विमृशतः महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया महान्तो जायन्ते व्यसनमि

व दातुं विषयिणाम् ३ भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं त्यक्त्वा जातिकुलाभि

मानमुचितं सेवा कृता निष्फला भुक्तं मानविवर्जितं परगृहे स्वाशङ्कया काकवत्तृष्णे दुर्मतिपा

पकर्मनिरते नाद्यापि संतुष्यसि ४ उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो निस्ती

र्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशा

प्राप्तः काणवराटकोऽपि न मया तृष्णे धुना मुञ्च मां ५ खलोल्लापाः सोढाः कथमपि तदाराधन

परैर्निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा कृतश्चित्तस्तम्भः प्रतिहतधियामञ्जलिरपि त्व

माशे मोघाशे किमपरमतो नर्तयसि माम् ६ स्वादिष्टं मधुनो घृतादि रसवद्यत्प्रस्तव

न्यत्परं देवी वागमृतात्मनो रसवतस्तेनैव तत्प्रावयम् कुर्मो यावदमी भवन्ति घृतये भीता

स्तः सत्कवस्त्रावधास्यकृताञ्जनैर्नैर्वृतघनैर्भोगान्कमीहामहे ८ आदित्यस्य गतागतैर

१

भीयः

रहरहः संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते दृष्ट्वा जन्मजरा
विपत्तिमरणं त्रासश्च नोत्पद्यते पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ८ दी
नादीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्या न चेद्गेहिनी
भं याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ९
निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः शनैर्यष्ट्यु
त्थानं घनतिमिररुद्धे च नयने अहो धृष्टः कायस्तदपि मरणापायचकितः १० हिंसाशून्यम
यत्नलभ्यमशनं धात्रा मरुत्कल्पितं व्यालानां पशवस्तृणाङ्कुरभुजः स्तुष्टाः स्थलीशायिनः संसा
रार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ११
न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् १२
भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः कालो न यातो वयमेव याताः तृष्णा न जीर्णा
वयमेव जीर्णाः १३ क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः सोढो दुःसहशीतवा
तपवनक्लेशो न तप्तं तपः ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शम्भोः पदं तत्तत्कर्म कृतं यद

देवमुनिभिर्ज्ञैर्मूलैः फलैर्वृत्तितः १४ वलीभिर्मुखमाक्रान्तं पलितैः शिरसांकितम् गात्राणि शि
२ थिलायन्ते तृष्णैका तरुणायते १५ येनैवाम्बरखण्डेन संवीतो निशि चन्द्रमाः तेनैव च दिवा भा
नुरहो दौर्भाग्यमेतयोः १६ अवश्यं यातारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यज
ति न जनो यत्स्वयममून् व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शमसुख
मनन्तं विदधति १७ विवेकव्याकोशे विदधति शमे शाम्यति तृषा परिष्वङ्गे तुङ्गे प्रसरति त
तः सा परिणतिः जराजीर्णैश्वर्यग्रसनगहनः होपकृपणः कृपापात्रं यस्यां भवति मरुतामप्य
धिपति १८ कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलः व्रणी पूतिक्लिन्नः कृमिकुलशतैरा
वृततनुः क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः शुनीमन्वेति श्वा हतमपि निहन्त्येव
मदनः १९ भिक्षाशनं तदपि नीरसमेकवारं शय्या च भूः परिजनो निजदेहमात्रम् वस्त्रं
च जीर्णशतखण्डमयी च कन्था हा हा तथापि विषया न परित्यजन्ति २० स्तनौ मांसग्र-
न्थी कनककलशावित्युपमितौ मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् स्रवन्मू
त्रक्लिन्नं करिवरकरस्पर्द्धि जघनमहो निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् २१

न खलु नरके हाशकां तेष्वनलं न मंडलं शाणीमधवा श्रोणीविंबरणन्मणीनैवलम् ६५ ॥
ज्ञाण धनानि त्रिजाति परधनं हरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युवतीजनकथा मूक
भावा परेषां तल्लो श्रोतो विपंगो परत्र च विनयाः सर्वभूतानुकंपा सामान्याः सर्वशास्त्रेष्वनुपह
तविधिः श्रेयसामेष पंथा ६६ पातालेष्वी भजन्स्वकं चिरपर्मित्कां हाणी प्राक्ष्य नामो गोष्को पि स्व
हालवो न हि वयं कानि स्वह्वा णामसि सद्यास्थूलपलाशपत्रपुटकापाद्ये पवित्रीकृते भिक्षान्नस
निरेव संप्रति वयं वृत्तिं समीहामहे ६७ अयं वयं वयं पमित्याभिन्नमतिरावयो किं जातमधुना ये
न त्वयं त्वं वयं वयं ६८ इयं बाला मां प्रत्यनवरतमिंदीवरदलप्रभाचौरं चक्षुः क्षिपति किमभिप्रेतम
नया डतो मोहो ह्यस्माकं स्मरशरमवाणव्यतिकरज्वलज्ज्वालाशांता तदपि न वराकी विरमति ६९ रम्यं
हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये किंतु भ्रांत
पतत्पतंग पवनव्याकोलोदीपांकुरच्छायाचंचलमाकलय्य सकलं संतो वनांतं गताः ७० किं कंद
कंदरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलि
न्यश्च शाखाः वीक्ष्यंते यन्मुखानि प्रसभमुपगतप्रश्रयाणां खलानां दुःखोपन्नाल्पवित्तस्म
यपवनवशाद्यवानर्तितभ्रूलतानि ७१ गंगातरंगकणशीकरशीतलानि विद्याधराध्युषित
चारुशिलातलानि स्थानानि किं हिमवतः प्रलयं गतानि यत्सावमानपरपिंडरता मनुष्याः ७२
यदा मेरुः श्रीमान्निपतति युगांताग्निनिहतः समुद्राः शुष्यंति प्रचुरमकरग्राहनिलयाः धरा गा

वै॰श॰ कन्थं तं धरसिंधुरपादैरपि धृता शरीरे का वार्ता करकलभकर्णाग्रचपले ७३ एका
८ की निस्पृहः शांतः पाणिपात्रो दिगंबरः। कदा शंभो भविष्यामि कर्मनिर्मूलनक्षमः ७४
प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं सन्मानिता प्रणयि ण
नो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किं भ्रांति भवे मरण जन्मभयं रु
रिष्टं लोहेन वंधुरनमन्मथजा विकाराः संसर्गदोषपरिहृति ता विजनावनांता वैराग्यम
मस्तकमनः प्रमार्जनीयं ७६ तस्मादनंतमजरं परमं विकाशि तद्ब्रह्म वांछत जनाः
यदि चेतनस्या यस्यानुषंगिण इमे भवनाधिपत्यभोगादयः कृपणलोकमता भवंति ७७
पातालमाविशसि यासि नभो विलंघ्य दिग्मंडलं भ्रमसि मानसचापलेन भ्रांत्यापि जातु
विमलं कथमात्मनीनं तद्ब्रह्म न स्मरसि निर्वृतिमेषि येन ७८ रात्रिः सैव पुनः स एवा
वदिवसो मत्वा बुधा जंतवो धावंत्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रिया व्यापा
रैः पुनरुक्तभुक्तविषयैरेवं विधेनामुना संसारेण कदर्थिता कथमहो मोहान्न लज्जाम
हे ७९ मही शय्या शापी विपुलमुपधानं भुजलता वितानं चाकाशं व्यजनमनु
कूलो यमनिलः स्फुरद्दीपश्चंद्रो विरतवनितासंगमुदितः सुखं शांतः शेते पुन
८

स्थानं विविक्तं मुनीनां विशुद्ध्यै कामातुराणामतिकामकारणम् ५१ जीर्णा एव मनोरथाः स्वहृद
ये जातं जरा यौवनम् हन्ताङ्गेषु गुणाश्च वन्ध्यफलितां याता गुणज्ञैर्विना किं युक्तं सहसाभ्युपैति
बलवान् कालः कृतान्तोऽक्षमी ह्या ज्ञातं त्रिपुरान्तकाङ्घ्रियुगलं मुक्त्वास्ति नान्यागती ५२ तृषा शुष्य
त्यास्ये पिबति सलिलं स्वादु सुरभि क्षुधार्तः सन् शालीन्कवलयति शाकादिवलितान् प्रदीप्ते रा
गाग्नौ सुदृढतरमाश्लिष्यति वधूं प्रतिकारो व्याधेः सुखमिति विपर्यस्यति जनः ५३ स्नात्वा गा
त्वा ङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले
आत्मारामः फलाशी गुरुवचनरतः त्वत्प्रसादात्स्मरारे दुःखं मोक्ष्ये कदाहं तव चरणरतो ध्या
नमार्गैकयत्नैः ५४ शय्या शैलशिला गृहं वस्त्रं तरूणां त्वचः सारङ्गाः सुहृदो ननु क्षितिरु गिरीगृहा
हां वृत्तिः फलैः कोमलैः येषां निर्झरमम्बुपानमुचितं रत्यै च विद्याङ्गना मन्ये ते परमेश्वरा
शिरसि यैर्बद्धो सेवाञ्जलिः ५५ सत्यामेव त्रिलोकीसरिति हरशिरश्चुम्बिनीविच्छटायां सद्वृ
त्तिं कल्पयत्यां वटविटपभवैर्वल्कलैश्च कोऽयं विद्वान्विपत्तिज्वरजनितरुजातिवदुःखासिका
नां वक्त्रं वीक्षेत दुःस्थे यदि हि न विभृयात्स्वे कुटुम्बेऽनुकम्पाम् ५६ उद्यानेषु विचित्रभोजन
विधिस्तीव्रातितीव्रं तपः कौपीनावरणं सुवस्त्रममितं यस्यां समुत्पद्यते तां काशीं परिहृत्य हन्त
न विबुधैरन्यत्र किं स्थीयते ५७ नायं ते समयो रहस्यमधुना निद्राति नाथो यदि स्थित्वा
द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां वचः चेतस्तानपहाय याहि भवनं देवस्य विश्वेशितु

वै॰ श॰ निर्दैकारिकनिर्दयोत्थपक्षं निःसीमशर्मप्रदम् ९८ प्रियसखिविपद्दण्डव्रातप्रपातपरंपरापरि
चयचले चिन्ताचक्रे निधाय विधिः खलः मृदमिव बलात्पिण्डीकृत्य प्रगल्भकुलालवद्भ्रमय
ति मनो नो जानीमः किमत्र विधास्यति ९९ रे कन्दर्प करं कदर्थयसि किं कोदण्डटङ्कारवैः रे रे
कोकिल कोमलैः कलरवैः किं त्वं वृथा जल्पसि मुग्धे स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं
चेतश्चुम्बितचन्द्रचूडचरणध्यानामृतं वर्त्तते १०० महेश्वरे वा जगतामधीश्वरे जनार्दने वा ज
गदन्तरात्मनि न वस्तुभेदप्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेन्दुशेखरे १०१ कौपीनं शतख
ण्डजर्जरतरं कन्था पुनस्तादृशी निश्चिन्तं सुखसाध्यभैक्ष्यमशनं शय्या श्मशाने मित्रामित्रस वने
मानतातिविमला चिन्ताथ शून्यालये ध्वस्ताशेषमदप्रमादमुदितो योगी सुखं तिष्ठति १०२
भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवस्तत्कस्यैव कृते परिभ्रमत रे लोकाः कृतं चेष्टितैः
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां कामोच्छित्तिवशे स्वधामनि यदि श्रद्धेयमस्म
द्वचः १०३ धन्यानां गिरिकन्दरे निवसतां ज्योतिः परं ध्यायतामानन्दाश्रुजलं पीवति शकुनाः निःशङ्क
मङ्केशयाः अस्माकं तु मनोरथैः परिचितं प्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषामायुः
परिक्षीयते १०४ आक्रान्तं मरणेन जन्म जरया यात्युज्ज्वलं यौवनं संतोषो धनलिप्सया शमसुखं
[illegible]ढाङ्गनाविभ्रमैः लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैरस्थैर्येण विभूतिरप्यपहृ [illegible]